# Vajrasattva Stotram

# वज्रसत्त्वस्तोत्रम्

## Document Information

Text title : Vajrasattva Stotram

File name : vajrasattvastotram.itx

Category : misc, buddha, stotra, aShTaka

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# वज्रसत्त्वस्तोत्रम्

वन्दे श्री ।
वज्रसत्त्वं भुवनवरगुरुं सर्वबुद्धं भवन्तं
नानारूपं जिनेन्द्रं तिमिरभयहरं निर्मितं मेरुशान्तम् ।
धर्माधारं मुनीनां जिनगुणशुभदं मण्डलं वज्रधातुं
सर्वानन्दैकरूपं परमसुखमयं देहिनां मोक्षहेतुम् ॥ १॥

अज्ञानगाढतिमिरार्णवमग्नसत्त्वमोहान्धकारतमवारणचन्द्ररश्मिः ।
ज्ञानं प्रकाश्य परिपूरितवीर्यध्यानं श्रीवज्रसत्त्वमसमं शिरसा नमामि ॥ २॥

यस्मिन् सुरासुरसुरेन्द्रनरेन्द्रवृन्दास्त्वत्पादपद्मपतिता भ्रमराः शिरोभिः ।
तत्सिद्धिसाधनपयोधिमहानिधानं श्रीलोकनाथचरणं शरणं प्रयामि ॥ ३॥

बुद्धं त्रैलोक्यनाथं सुरवरनमितं पारसंसारतीर्णं
धीरं गाम्भीर्यवन्तं सकलगुणनिधिं धर्मराजाभिषिक्तम् ।
तृष्णामोहान्धकारं कलिकलुषहरं कामलोभादवन्तं
तं वन्दे शाक्यसिंहं प्रणमितशिरसा सर्वकालं नमामि ॥ ४॥

ह्रीङ्कारसम्भवं नाथं करुणास्निग्धमानसम् ।
अमोघपाशनामानं लोकनाथं नमाम्यहम् ॥ ५॥

मामकी लोचना तारा पद्मिनी जिनधातवे ।
सर्वबुद्धालयं चैत्यं धर्मधातुं नमामि तम् ॥ ६॥

नमस्तारे तुरे वीरे तुत्तारे भयनाशिनि ।
तुरे सर्वातुरे काले स्वाहाकारं नमाम्यहम् ॥ ७॥

सद्धर्मपुण्डरीकाक्षं सर्वज्ञगुणसागरम् ।
समन्तभद्रशास्तारं शाक्यसिंहं नमाम्यहम् ॥ ८॥

इति श्रीवज्रसत्त्वस्तोत्रं सम्पूर्णम् ॥

*Vajrasattva Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*